National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(56): 242-244
© 2024 NJHSR
www.sanskritarticle.com

**राहुल शर्मा**
राष्ट्रीय संस्कृत विश्वविद्यालय,
तिरुपति, आंध्र प्रदेश

**Correspondence:**
**राहुल शर्मा**
राष्ट्रीय संस्कृत विश्वविद्यालय,
तिरुपति, आंध्र प्रदेश

# 5.4 नक्षत्रणां कूर्मचक्रविभागः

**राहुल शर्मा**

**नक्षत्रत्रयवर्गैराग्नेयाद्यैर्व्यवस्थितैर्नवधा।**
**भारतवर्षे मध्यप्रागादिविभाजिता देशाः।।**

सम्पूर्ण भारतवर्षम् मध्यभाग-पूर्व-आग्नेय-दक्षिण-नैर्ट्टत्य-पश्चिम-वायव्य-उत्तर-ईशानेषु नवसु खण्डेषु विभज्य कृत्तिकानक्षत्रदारभ्य क्रमशः एकैकं नक्षत्रम् प्रदक्षिणक्रमेण स्थापयन् गच्छेत्। तिसृषु परिक्रमासु (27) सपतविंशतिनक्षत्रणि पूरितानि भविष्यन्ति।

एवं रीत्य त्रिणि-त्रिणि कृत्तिकादिनक्षत्रणामेकैकम् कूर्मविभागः मन्यते। इदं कूर्बचक्रं कथ्यते। एतत् आधारीकृत्य भूमण्डलस्य मेदनीय शुभाशुभयोः विचारः क्रियते। अनेन विधिना सम्पूर्णं पृथ्वीमपि (9) नवखण्डेषु विभक्तुं शक्यते।

श्लोके भारतवर्षात् तात्पर्यं इदानीनतन भारतवर्षमेव नास्ति। भारतवर्षात् सकलस्य तस्य भूभागस्य ग्रहणमस्ति, यश्च उत्तरीध्रुंवतः दक्षिणे सिथतोऽसित। तस्मिन् समये नूतनसंसारः अमेरिका वा भवतु ज्ञातम् नासीत्। अतः भारतवर्षशब्दात् तत्कालीनसकलभूमण्डलादेवाशयः आसीत्। इति तर्केण अयं कूर्मविभागः, सर्वादौ सकलपृथिव्याम्, तदनु अपेक्षानुगुणं बृहत्परिमाणतः लघुं प्रति चलन् राष्ट्रः, प्रदेशादिष्वपि कल्पितुं शक्यते। गार्गेण क्षितिशब्दस्य प्रयोगं कृत्वा अमुं विषयं स्पष्टमेव अकारि। अन्येषु ग्रन्थेषु अस्मै 'पृथ्वीकूर्मः।' इति कथितमस्ति।

**कृत्तिकाद्यैस्त्रिभिर्भवर्गैर्नवभिः क्षितिः।**
**कल्पिता मध्यदेशादौ प्रागादिक्रमयोगतः।।(गर्ग)**

| भूभाग | नक्षत्रम् | भूभाग | नक्षत्रम् | भूभाग | नक्षत्रम् |
|---|---|---|---|---|---|
| मध्य | कृ.रो.मृ. | दक्षिण | उ.ह.चि. | वायव्य | उ.श्र.ध. |
| पूर्व | आ.पु.पुष्य | नैऋत्य | स्वा. वि.अनु. | उत्तर | श.पू.उ. |
| आग्नेय | श्ले.म.पू. | पश्चिम | ज्येष्ठा.मूल.पूषा. | ईशान | रे.अश्वि.भर. |

**मध्यदेश विभागः-**

**भद्रारिमेदमाण्डव्य सालवनीपोज्जिहानसंख्याताः।**
**मरुवत्सघोषयामुनसारस्वतमत्स्यमाध्यमिकाः।।2।।**
**माथुरकोपज्योतिषधर्मारण्यानि शूरसेनाश्च।**
**गौरग्रीवोद्देहिकपाण्डुगुडाश्वत्थपाञ्चालाः।।3।।**
**साकेतकघ्ककुरुकालकोटिकुकुराश्च पारियात्रनगः।**
**औदुम्बरकापिष्ठलगजाह्वयाश्चेति मध्यमिदम्।।4।।**

भद्र, अरिमेद, माण्डव्य, साल्व, नीप, उन्निहान, संख्यात, मरुभूमि, वतन, घोष, यमुना प्रदेश, सरस्वती नदी का प्रदेश, मत्स्य व माध्यमिक, माधुरक, उपज्योतिष, धर्मारण्य, शूरसेन, गौरग्रीव,

उद्देहिक, पाण्डु , अश्वत्थप्रदेशः, पांचालराष्ट्राः।

साकेत, कक, कुरु, काल कोटि, कुकुर, पारियात्र पर्वत, औदुम्बर, कापिष्ठल, गजाह्वप्रदेशाः कृत्तिका, रोहिणी मृगशिराणां नक्षत्राणामधीनस्थाः सन्ति।

पाराशरेण जम्बूद्वीपस्य विस्तारः (1040) योजनात्मकः उक्तः वर्तते। पूर्वपश्चिमरत्नाकरयोः मध्ये (6) षड्महापर्वताः हिमवान्- हेमकूट-निषध-नील-श्वेत-शृंगवन्तः सन्ति। चत्वारिंशत् (40) दीर्घनद्यः, (4) चत्वारः महोदधर्मः सन्ति। समुद्रे षतितवत्यः नदीनां संख्या (60000) उक्तवानस्ति। (91) राज्यानि पृथिव्यां सम्भवतः लघुराज्यानि अथवा राष्ट्राः (99) नवनवतिः संख्यकानि सन्ति। दशदीर्घवनानि (28) द्वीपाः सन्ति 15000 जनपदानि उक्तानि सन्ति। इत्थम् पाराशरीसंहितायाः एतस्मात् कथनात् प्रतीतो भवति यत् तात्कालीन भूगोलस्य विवरणं प्रस्तुतं विद्यते। पाराशरेण सकलश्च पृथिव्याः विभागः अत्र प्रतिपादितमस्ति इदम् स्पष्टमस्ति। दिशामनुसारेण राष्ट्रानां विभाग तथा च संज्ञा पाराशरी संहितायामपि यथावत् एव प्राप्यते। एतेषां राष्ट्रानाम् अद्यतनयुगे ज्ञातुमशक्यमस्ति।

**पूर्वराष्ट्रविभागः (आर्द्रा-पुनर्वसु-पुष्यनक्षत्राणि-**

**अथ पूर्वस्यामञ्जनवृषभध्वजपद्ममाल्यवद्गिरयः।**
**व्याघ्रमुखसुह्मकर्वटचान्द्रपुराः शूर्पकर्णाश्च ।। 5।।**
**खसमगधशिविरगिरिमिथिलसमतटोड्राश्ववदनदन्तुरकाः ।**
**प्राग्ज्योतिषलौहित्यक्षीरोदसमुद्रपुरुषादाः ।। 6 ।।**
**उदयगिरिभद्रगौडकपौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः ।**
**एकपदताम्रलिप्तककोशलका वर्धमानाश्च ।। 7 ।।**

अंजनगिरि, वृषभध्वज गिरि, पद्मगिरि, माल्यवान् पर्वत, व्याघ्रमुख, सुम, कर्कट (कर्वट), चन्द्रपुर, शूर्पकर्णराष्ट्राः ।

खस, मगध, शिविर पर्वत, मिथिला, समतट, उड्र, अश्ववदन, दन्तुरक, प्राग्ज्यौतिष, लौहित्य, पुरुषाद प्रदेश, उदयगिरि, भद्र, गौड देश, पौण्ड्र, उत्कल, काशी, मेकल, अम्बष्ठ, एक पद, ताम्रलिप्तक, कोशल, वर्धमान प्रदेशाः नक्षत्रत्रयवर्गेषु समायन्ति।

**आग्नेयकोशप्रदेशाः (श्लेषा-मघा-पूर्वाफाल्गुनीनक्षत्रणि-**

**आग्नेय्यां दिशि कोशलकलिङ्गवङ्गोपवङ्गजठराङ्गाः ।**
**शौलिकविदर्भवत्सान्ध्रचेदिकाश्चोर्ध्वकण्ठाश्च ।। 8 ।।**
**वृषनालिकेरचर्मद्वीपा विन्ध्यान्तवासिनस्त्रिपुरी ।**
**श्मश्रुधरहेमकुड्यव्यालग्रीवा महाग्रीवाः ।। 9 ।।**
**किष्किन्धकण्टकस्थलनिषादराष्ट्राणि पुरिकदाशार्णा ।**
**सह नग्नपर्णशबरैराश्लेषाद्ये त्रिके देशाः ।। 10 ।।**

आग्नेयकोणे कोशल, वंग, कलिङ्ग, उपवंग, जठरांग, शूलिक, विदर्भ, वत्स, आन्ध्र, चेदि, उर्ध्वकण्ठ। वृषदेश, नालिकेर स्थान, चर्मद्वीप, विन्ध्यान्तवासिदेश, त्रिपुरी, श्मश्रुधरदेशाः । हेमकुड्य, व्यालग्रीव व महाग्रीव। किष्किन्धा, कण्टकस्थल, निषादराष्ट्र, पुरिक, दाशार्ण, नग्नशवर, पर्णशवराः एते देशाः श्लेषा, मघा पूर्व फाल्गुनि, वर्गे समायान्ति।

**दक्षिणदिग्देशः**

**अथ दक्षिणेन लङ्काकालाजिनसौरिकीर्णतालिकटाः ।**
**गिरिनगरमलयर्द्दरमहेन्द्रमालिन्यभरुकच्छाः ।। 11 ।।**
**कङ्कटकङ्कणवनवासिशिविकफणिकारकोङ्कणाभीराः ।**
**आकरवेणावर्तकदशपुरगोनर्दकेरलकाः ।। 12 ।।**
**कर्णाटमहाटविचित्रकूटनासिक्यकोल्लगिरिचोलाः ।**
**क्रौञ्चद्वीपजटाधरकावेर्यो रिष्यमूकश्च ।। 13 ।।**
**वैदूर्यशङ्खमुक्तात्रिवारिचरधर्मपट्टनद्वीपाः ।**
**गणराज्यकृष्णवेल्लूरपिशिकशूर्पाद्रिकुसुमनगाः ।। 14 ।।**
**तुम्ववनकार्मणयकयाम्योदधितापसाश्रमा ऋषिकाः ।**
**काञ्चीमरुचीपट्टनचेर्यार्यकसिंहला ऋषभाः ।। 15।।**
**बलदेवपट्टनं दण्डकावनतिमिङ्गिलाशना भद्राः ।**
**कच्छोऽय कुञ्जरदरी सताम्रपणीति विज्ञेयाः ।। 16 ।।**

दक्षिणे लंका-कालाजिन, सीरिकीर्ण, तालिकट, गिरिनगर, मलय,दर्दुर-मालिन्द्य भरु कच्छ प्रदेशाः।

कंकट, कंकण, वनवासी, शिविक, फणिकार, कोंकण, आभीर, आकार, वेणादर्त आवर्तक देश, दशपुर, गोनद, करेलप्रदेशाः ।

कर्णाट, चित्रकूट, नासिक्य, कोल्लगिरि, चौल, क्रीचद्वीप, जटाधर, कावेरी नदी, ऋष्यमूकपर्वताः।

वैदूर्यप्रदेशः, अत्रि ऋषेराश्रमः, वारिचरः, धर्मपत्तन द्वीपः, कृष्णवेल्लूरराज्यम्, पिशिक, शुर्पाद्रिपर्वतः कुसुमपर्वतश्च ।

तुम्बवनम्, कार्मणेयक, दक्षिणीसमुद्रः, तापसाश्रमः, ऋषिकप्रदेशः, कांची, मरुचीपट्टन, चेयर्विकदेशः, सिंहलः, ऋषभश्च।

वलदेवपट्टन, दण्डकवन, तिमिगिलाशनदेशः, भद्र, कच्छ, कुंजरटरी, ताम्रपणीनदी एते उत्तराफाल्गुनी, हस्त, चित्रा एते त्रय नक्षत्राणां वर्गप्रदेशः वर्तते।

**नैऋत्य देश विभागः**

**नैर्ऋत्यां दिशि देशाः पह्लवकाम्बोजसिन्धुसौवीराः ।**
**वडवामुखारवाम्बष्ठकपिलनारीमुखानर्ताः ।। 17 ।।**
**फेणगिरियवनमार्गरकर्णप्रावेयपारशवशूद्राः ।**
**बर्बरकिरातखण्डक्रव्यादाभीरचञ्चूकाः ।। 18 ।।**
**हेमगिरिसिन्धुकालकरैवतकसुराष्ट्रवादरद्रविडाः ।**
**स्वात्याद्ये भत्रितये ज्ञेयश्च महार्णवोऽत्रैव ।। 19 ।।**

पह्लव, काम्बोज, सिन्धु, सौवीर, वडवामुख, अम्बष्ठ, अरव, कपिला, नारीमुख, आनर्त। फेणगिरि, यवन, मार्गर, कर्णप्रावेय, पारशव, शूद्र, बर्नर, किरात, खण्ड, क्रव्याद, आभीर, चंचूक ।

हेमगिरि, सिन्धुनदी, कालक, रैवतक पर्वत, सुराष्ट्र, वादर, द्रविड, पश्चिमीमहासागरकः इमानि स्थानानि स्वाती, विशाखा अनुराधानां त्रयाणां नक्षत्राणां वर्ग समायान्ति।

**पश्चिम देश विभागः**

**अपरस्यां मणिमान् मेघवान् वनौघः क्षुरार्पणोऽस्तगिरिः ।**
**अपरान्तकशान्तिक हैहयप्रशस्ताद्रिवोक्काणाः । । 20 ।।**
**पञ्चनदरमठपारततारक्षितिजृङ्गवैश्यकनकशकाः ।**

**निर्मर्यादा म्लेच्छा ये पश्चिमदिस्थितास्ते च ।। 21 ।।**

पश्चिमदिशायां मणिमान्, मेघवान् पर्वत-वनौघप्रदेश-क्षुरार्पण-अस्तगिरि-अपरान्तक-शान्तिक- हैहय-प्रशस्ताद्रि-वोक्काणदेशाः। पंचनद-रमठ-पारत-तारक्षिति-नंग-वैश्य-कनक- शक-म्लेच्छप्रदेशाः ज्येष्ठा, मूल पूर्वाषाढा एतेषां नक्षत्रां वर्गे स्थिताः सन्ति।

**वायव्य देश विभाग:**

**दिशि पश्चिमोत्तरस्यां माण्डव्यतुषारतालहलमद्राः ।**
**अश्मककुलूतहलडाः स्त्रीराज्यनृसिंहवनखस्याः ।। 22 ।।**
**वेणुमती फल्गुलुका गुलुहा मरुकुच्चचर्मरङ्गाख्याः ।**
**एकविलोचनशूलिकदीर्घग्रीवास्यकेशाश्च । । 23 ।।**

माण्डव्य-तुषार-ताल-हल-मद्र-अश्मक-कुलूत-हलड-स्त्रीराज्यनृसिंहवन - खस्थ ।

वेणुमतीनदी-फल्गुलुक-गुलुह-मरुकुच्च-चर्मवर्णः,एकविलोचनः,शूलिक, दीर्घग्रीव, दीर्घास्य, दीर्घकेशदेशाः वायव्यकोणः वर्तते एवं उत्तरषाढा, श्रवण, धनिष्ठा एते नक्षत्राणां वर्गे समापतन्ति।

**उत्तरदिक् देशाः-**

**उत्तरतः कैलासो हिमवान् वसुमान् गिरिर्धनुष्मांश्च ।**
**क्रौञ्चो मेरुः कुरवस्तथोत्तराः क्षुद्रमीनाश्च ।। 24 ।।**
**कैकयवसातियामुनभोगप्रस्थार्जुनायनाग्नीघ्राः ।**
**आदर्शान्तीपित्रिगर्ततुरगाननाः श्वमुखाः ।। 25 ।।**
**केशधरचिपिटनासिकदासेरकवाटधानशरधानाः ।**
**तक्षशिलपुष्कलायतकैलावतकण्ठधानाश्च ।। 26 ।।**
**अम्बरमद्रकमालवपौरवकच्छारदण्डपिङ्गलकाः ।**
**माणहलहूणकोहलशीतकमाण्डव्यभूतपुराः ।। 27 ।।**
**गान्धारयशोवतिहेमतालराजन्यखचरगव्याश्च ।**
**यौधेयदासमेयाः श्यामाकाः क्षेमधूर्ताश्च ।। 28 ।।**

उत्तरदिशायां कैलासपर्वत, हिमवान् (हिमालय) वसुमान् (पर्वत) धनुष्मान् (पर्वत), क्रौञ्चपवंत-मेरुपर्वत-उत्तरकुरु-क्षुद्रमीनदेश-कैकय-वसाति-यामुनप्रदेश-भोगप्रस्थ,-अर्जुनायन-आग्नीध्र-आदर्श-अन्तद्वीपी-त्रिगत्त-तुरगानन-श्वमुखदेशाः। केशगृह-चिपिटनासिकदेश-दासेरक-वाटधान-शरधानदेश-तक्षशिला-पुष्कलावत-कैलावत-कण्ठधान-अम्बर-भद्र-मालव-पौरव-कच्छार-दण्ड-पिंगलक-माण-हूण-कोहल-शीतक-माण्डव्य-भूतपुर। गान्धार-यशोवतीनगरी-हेमताल-राजन्य-खचर-गव्य-यौधेय-दासमेय-श्यामाक-क्षेमधूर्त ।

एते देशाः शतभिषा, पूर्वा भाद्रपद, उत्तरा भाद्रपद नक्षत्राणां वर्गे सन्ति।

**ईशानदिक् देशाः-**

**ऐशान्यां मेरुकनष्टराज्यपशुपालकीरकाश्मीराः ।**
**अभिसारदरदतङ्गणकुलूतसैरिन्ध्रवनराष्ट्राः ।। 29 ।।**
**ब्रह्मपुरदार्वडामरवनराज्यकिरातचीनकौणिन्दाः ।**
**भल्लाः पटोलजटासुरकुनटखसघोषकुचिकाख्याः । । 30 ।।**
**एकचरणानुविद्धाः सुवर्णभूर्वसुधनं दिविष्ठाश्च ।**
**पौरवचीरनिवासित्रिनेत्रपुञ्जाद्रिगान्धर्वाः ।। 31 ।।**

ईशानदिशायां मेरुक-नष्टराज्य-पशुपाल-कीर-कश्मीर-अभिसार-दरद-तंगण-कुलूत-सैरिन्ध्र अथवा वनराष्ट्र। ब्रह्मपुर-दावं-डामर-वनराज्य-किरात-चीन-कीणिन्द-भल्ल-पटोलदेश-जटासुर-कुनट-खस-घोष-कुचिक। एकचरण-अनुविद्ध-सुवर्णभू-वसुधन-दिविष्ठ-पौरव-चीरनिवासी-त्रिनेत्र-मुञ्जपर्वत-गान्धर्वदेशाः। एते सर्वे रेवती, अश्विनी, भरणी नक्षत्राणां वर्गदेशीयः सन्ति।

**कूर्मचक्रविचारः-**

पूर्वोक्तकृत्तिकादनक्षत्र त्रयाणां ये (9) नववर्गाः सन्ति, एतेषु वर्गेषु यत्र कूरग्रहाः (शनि-मघ्गल-सूर्याः) स्थितो भूत्वा एतान् नक्षत्रन् पीडयन्ति तस्यैव वर्गस्य राष्ट्रेषु प्रदेशेषु विनाशलीला प्राकृतिक प्रकोपाः भवन्ति। पुनश्च विशेषेण कृत्तिकादिवर्गान्तः पांचालदेशः, आर्द्रादिवर्गात् माघः, क्ष्लेषदिवर्गात् कलिघ्गप्रदेशः, उत्तराफाल्गुनिवर्गात् अवन्तीदेशः, स्वातीवर्गात् आनर्तदेशः, ज्येष्ठावर्गात् सिन्धुसौवीरदेशः, उत्तराषाढा-वर्गात् हारहौरदेशः, शतभिषावर्गात् भद्रदेशः रेवतीवर्गात् कौणिन्यदेशाः।

कूर्मचक्रः पृथ्वीमण्डलस्य फलविचारस्य एका विधेः संज्ञा वर्तते। सर्वतोभद्रचक्रम्, सप्तनाडी चक्रः अहिबलचक्रादिरिव इदमपि एकं फलेर्विचारोपगीचक्रमात्रमेवास्ति।

येषु नक्षत्रेषु शन्यादिपापग्रहाः (शनिमघ्गलौ विशेषौ स्तः। गोचरी कुर्मुः तथा विशेषतया पापयुक्तः, पापयुतिः पापदृष्टश्चेत् तस्याम् दिशस्थदेशेषु विशेषोभद्रवाः परिवर्तनानि च भवन्ति।

अद्यत्वे शनिः उत्तरदिग्नक्षत्रेषु स्थितोऽस्ति। फलस्वरूपं कुम्भगतेशमेः गोचरे उत्तरीदेशेषु (सोवियत रूस, जर्मनी, पाकिसतान, काश्मीरादि) विशिष्ट युद्धादि प्रायः प्राकृतिकप्रकोपाः भवन्ति। विशेषतया शनेर्दृष्टिरपि घातको भवति। उत्तरदिग्नक्षत्रेषु चलन् काले शनेर्दृष्टिः दक्षिणी प्रदेशेष्वपि भवति। अतः अफ्रीकायाः राजनैतिक परिवर्तनं प्रत्यक्षमेव विद्यते।

अनन्तरं यामलग्रन्थेषु कूर्मचक्रस्य विशेषविचारोऽपि कथितमस्ति । कूर्मचक्रे मुख सर्वदा पूर्वदिशि भवति। नाभिशिरः, चतुष्पाद, कुक्षिद्वियम्, पुच्छम एवं (9) नवाङ्गभिनवदिशाम् (9) प्रतिनिधयः भवन्ति।

कुर्मचक्रे पूर्वपश्चिमयोः उत्तरदक्षिणयोः आग्नेय वायव्योः, ईशान नैर्ऋत्ययोः परस्परं वेधं भवति।

**तस्योपरि स्थिता तत्र सप्तद्वीपयुतामही।**
**पूर्वभागे मुखं तसय पुच्छ पश्चिममण्डले ।।**
**पूर्वापरं लिखेद्वेध वेधं चोत्तर दक्षिणे।**
**ईशानराक्षसे वेधं वेधमाग्नेयमारुते ।।**
**तारा त्रयाकिते तस्मिन् सौरिं यत्नेन चिन्तयेत्।**
**यत्रस्थ, पीडयेतु तत्र वेधस्थाने तथैव च।।**

विश्वकर्माविधिनाऽपि देश-प्रदेश-नगर ग्राम बस्ती गृहेषु अपि कुर्मचक्रस्य विचारः क्रियते। एतदर्थम् एतेषां नामनक्षत्राणां मध्यतः आरभ्य यथावत् (3-3) नक्षत्राणा स्थापनां कृत्वा फलविचारः विधीयते।